National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022; 1(44): 223-228
© 2022 NJHSR
www.sanskritarticle.com

**डॉ उपेन्द्र भार्गव**
सहायक आचार्य एवं विभागाध्यक्ष,
ज्योतिष विभाग,
महर्षि पाणिनि संस्कृत एवं वैदिक-
विश्वविद्यालय, उज्जैन

**Correspondence:**
**डॉ उपेन्द्र भार्गव**
सहायक आचार्य एवं विभागाध्यक्ष,
ज्योतिष विभाग,
महर्षि पाणिनि संस्कृत एवं वैदिक-
विश्वविद्यालय, उज्जैन

# वेदपुराणादिषु कालपदार्थाः

**डॉ. उपेन्द्रभार्गवः**

"पञ्चसंवत्सरमयं युगाध्यक्षमित्यादिरीत्या दिनत्र्ययनमासादयाङ्गानि कालस्योक्तानि।" अत एवोच्यते यत् सूक्ष्मकालात् स्थूलं यावत् कलनं यत् विद्यते तत् सकलमपि कालपदार्था-वयवीभूतम्। वेदेषु पुराणादिषु च ये ज्यौतिषविषयाः वर्णिताः तेषु सकलमपि कालजातमेव। वस्तुतः कैश्चित् मन्यते यत् वेदानां प्रादुर्भावात् प्रागपि ज्यौतिषं आसीदिति। किन्तु तदानीं तस्य किं स्वरूपं किं च धरातलमासीदिति स्पष्टतया वक्तुं नैव शक्यते प्रमाणाभावात्। किन्तु वैदिकसाहित्ये तु पर्याप्तं ज्यौतिषज्ञानं संदृश्यते। तत्सकलमपि कालपदार्थविवेचनं करोति। वस्तुतस्तु वेदानां संहिताभागे ब्राह्मणभागे च बहुविधाः ज्योतिषशास्त्रविषयाः कालपदार्थसंबद्धाः प्रतिपादिताः सन्ति। यत्र हि कालचक्रस्य युगे कल्पे संवत्सरे मासे अर्धमासे अहोरात्रे च विभागो विहितः। अह्नश्च प्रातः पूर्वाह्नमध्याह्नापराह्नसायाह्नादिविभागाश्च आवश्यकतानुरूपेण वर्णिताः सन्ति। एवं हि सूर्यः सौरपरिवारः सौरमण्डलाख्यः पृथिव्यन्तरिक्षं द्यौश्च वर्णिताः। तत्रापि विशेषेण द्युस्थानीयस्य सूर्यस्य अन्तरिक्षस्थानीयस्य वायोः भूस्थानीयस्याग्नेश्च विषयाः यथावसरं वर्णिताः। तत्रोक्तवचनैः सूर्यो हि परमं ज्योतिरिति प्रसिद्धः। स हि सर्वं प्रीणाति प्रेरयति च। स एव दृष्टिकारकः अन्ये च ये वेनादयः ग्रहाः तेऽपि तस्यैव ग्रहत्वेन प्रसिद्धाः। वेन इति शब्देन शुक्रस्याभिज्ञानं जायते।

**"अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने।**
**इममपां सङ्गमे सूर्यस्य शिशुन्न विप्रा मतिभीरिहन्ती॥"**

ऋग्वेदस्य दशममण्डलोक्तसूक्तेऽस्मिन्मन्त्रे देवता वेन एव। स च वेनः शुक्र इति कथ्यते। सूर्यः ऋतूनां कारणीभूतत्वेन स्थितः। स तु क्रान्तिवृत्ते स्थितः। तत एव तारकाःप्रकाशं लभन्ते जगच्च ज्योतिर्धर्मश्चावाप्नोति। स एव कालचक्रस्य विभाजकत्वेन स्मृतः। अथर्ववेदे तु कलापदार्थमाश्रित्य सूक्तानां संदर्शनं जायते। तेषु सूक्तानां देवताऽपि काल एव। यथात्र —

**"कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः।**
**तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा॥'**

अत्रोक्तवचनेन तु सप्तरश्मिः सूर्योऽपि कालाश्रित एव। यतोऽहि सूर्यस्य अवस्थितिस्तु कालाधीना विद्यतेऽति सूर्यसिद्धान्तेऽपि दृश्यते 'न मे तेजः सहः कश्चिदाख्यातुं नास्ति मे क्षणः।6" मयासुराराधनेन प्रीतः सूर्यः साक्षादुपदेशकथने दोषं कथयति यत् समग्ररूपेण वक्तुं मे उपदेशकालापेक्षितसमयो नास्तीत्यनेन वचनेन तस्य सूर्यस्यापि कालाश्रयत्वं संदृश्यते। अयं कालः सकलभुवनसंचालको विद्यते। सकलमपि वस्तुजातं कालाश्रितमेवेति वेदेषु वर्ण्यते। स च कालः पृथिव्यन्तरिक्षदिगादीनां जनकः।

**"कालोऽमूं दिवमजनयत्काल इमाः पृथिवीरुत।**
**काले ह भूतं भव्यं चेषितं ह वि तिष्ठते॥**
**कालो भूतिमसृजत काले तपति सूर्यः।**
**काले ह विश्वा भूतानि काले चक्षुर्वि पश्यति॥'**

ज्यौतिषशास्त्रेषु स्मृतिपुराणादिषु च यत् ब्रह्मस्वरूपात्मकं तत्त्वं परिलक्ष्यते तदपि कालेनैव संभवति पुनश्च काले प्रलीयते। इमाः सर्वाः प्रजाः तेषां परिपालकः प्रजापतिः स्वयंभूः कश्यपश्च सर्वेऽपि कालवशादुत्पद्यन्ते कालवशादेव प्रलीयन्ते च।

**"कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम्॥**
**कालः प्रजा असृजत कालो अग्रे प्रजापतिम्।**

**स्वयंभूः कश्यपः कालात्तपः कालादजायत॥"**

अथर्ववेदानुसारेण कालस्य महत्ता विशेषोत्कर्षेण प्रतिपादिता। तत्र च कालो हि श्रेष्ठः बलवत्तरः तेनैव इयं विसृष्टिः उत्पकास्थिति-लयाद्यवस्थां गच्छति। तेनैव सर्वे देवाः सूर्याचन्द्रमसौ वायुः दिशादीयानामुत्पकाःभवति।

**"कालादापः समभवन्कालाद् ब्रह्म तपो दिशः।**
**कालेनोदेति सूर्यः काले नि विशते पुनः॥**
**कालेन वातः पवते कालेन पृथिवी मही।**
**द्यौर्मही काल आहिता॥"**

अत्रोत्कर्षः कालस्यैव दृश्यते। कालेन ऋचः (ऋग्वेदः) यजुर्वेदादयोऽपि कालेना-भूवन्निति वर्णितं विद्यते। ऋग्वेदस्य प्रथममण्डले तु कालचक्रस्य वर्णनं विहितम्। तस्य स्वरूपं तत्र विवेचितम्। यथा —

**"द्वादश प्रधयश्चक्रमेकं त्रीणि नाभ्यानि क उतच्चिकेत।**
**तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः॥"**

एकं चक्रं विद्यते द्वादश तस्य प्रधयः सन्ति नाभित्रयात्मकं तच्चक्रं विद्यतेऽत्यत्र वर्णितम्। तत् च (3600) षष्ट्युत्तरस्त्रिशतांशमितेषु भागेषु विभक्तमिति वर्णनमत्रोपलभ्यते। एवं हि अन्यत्रापि तत्सदृशमेव स्वरूपवर्णनं कृतम्।

**"द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य।**
**आ पुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः॥"**

अत्रोक्तप्रकारेण तु वृत्तपरिधेः द्विगुणितांशानां विंशत्युत्तरसप्तशतानां (7200) वर्णनं विद्यते। अत्रानुमन्यते यत् "मिथुनासो" इत्यनेन रविचन्द्रयोः वृत्तयोः योगमानेन 3600 + 3600 = 7200 इमे अंशाः संभवन्ति। तर्हि द्वयोरपि परिधिः 3600 अंशात्मिकासीदिति परिज्ञानं तदा जात आसीदि विज्ञायते। अस्यां परिधौ एव सकलं कालचक्रं चलति।अथाधुना वेदेषु वर्णितानां कालाङ्गभूतानां पदार्थानां विवरणं विधास्यते।

**वेदे कल्पशब्दः -**

ज्योतिषे पुराणादिषु यथा स्वातन्त्र्येण कल्पशब्दप्रयोगो विहितः न तथा वेदेषु दृश्यते। यतोऽहि ज्योतिषपुराणादिषु कल्पशब्देन ब्रह्मणः दिनमेकमिति वर्णितम्। किन्तु तदितरेषु वेदेषु संहितारण्यकादीनां विवेचनेन कल्पशब्दस्यप्रयोगार्थभेदो दृश्यते। तैकारीयारण्यके12 कल्पशब्दस्य प्रयोगः कल्पसूत्रस्यार्थे विहितः। तथा च विष्णुपुराणे13 सहस्रं युगानां वेधसो दिनं कल्पशब्देनोच्यते। ब्रह्मण आयुषो मानं तन्मानेनैव शतवर्षात्मकं स्वीक्रियते यन्महाकल्प-शब्देनाभिधीयते। परन्तु वेदेषु कल्पापेक्षया महत्तमं कालमानं युगसंज्ञकं बहुत्र वर्णितम्।

**वेदे युगस्वरूपविवेचनम् –**

वस्तुतः वेदेषु युगशब्दस्य प्रयोगः कालमानस्य वाचकत्वेन कृतः। प्राथम्येन तु काल-मानव्यवहारं प्रदर्शयति युगशब्दः। कृतयुगत्रेताद्वापरादीनां चतुर्णां युगानामपि वर्णनं वेदेषु बहुत्र विद्यते। किन्तु केवलं युगशब्दप्रयोगबाहुल्यं विद्यमानत्वात् निश्चीयते यत् युगशब्देन कालस्य दीर्घतमं कलनं एव। यथात्र "तदूचुषेमानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत्।14"इन्द्रस्य प्रशंसनीयमभिधानं "मघवा" इत्याख्यं युगानि कीर्तयन्तीत्यनेन महत्तमकालमानं एव युगसंज्ञकमत्रालोक्यते। अन्यत्र च —

**"देवानां नु वयं जाना प्र वोचाम विपन्यया।**
**उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे॥"**

अत्रापि युगशब्देन कालमानस्य महत्तमं स्वरूपं वर्ण्यते। एवं हि अग्रेऽपि देवानां पूर्वं (देवानां उत्पकातः प्राक्), उत्पत्त्यनन्तरं च यः दीर्घतमः कालः सोऽपि युगशब्देन व्यवहृतः। यथा —

**"ब्रह्मणस्पतिरेता सं कर्मार इवाधमत्।**
**देवानां पूर्व्ये युगेऽसतः सदजायत॥"**
**"देवानां युगे प्रथमेऽसतःसदजायत।**
**तदाशा अन्वजायन्त तदुत्तानपदस्परि॥"**

अत्र सायणाचार्येणानुमन्यते यत् अत्रप्रयुक्तः युगशब्दः कृतादि-चतुर्युगवाचकः। अन्यत्र च "त्रियुगम्" इति पदप्रयोगोऽपि दृश्यते "या ओषधीः जाता देवेभ्यस्त्रियुगं पुरा।"अत्र त्रियुगमित्यनेन कृतादियुगत्रयमथवा वसन्तवर्षाशरदिति ऋतुत्रयमर्थं सायणाचार्येण अनुमतम्। महीधरेण तु त्रियुगमित्यस्यार्थः वसन्तवर्षाशरदेव स्वीकृतः। ऋग्वेदे अन्यत्रापि युगशब्दः19 परिलक्ष्यते। तत्रापि युगशब्दप्रयोगेन कस्यापि कालभागस्यैव ग्रहणं कृतम्। किन्तु सर्वत्रापि युगमिति शब्दस्य कालः कः किं च तस्य प्रमाणमित्युल्लेखो न विद्यते।

**वेदे चतुर्युगानि -**

वेदेषु कृतादि चतुर्णां युगानां सन्दर्भे तैत्तरीयसंहितायां कृतादिशब्दानामुल्लेखो दृश्यते। अत्रैतेषां स्तुतिपरकवर्णनं विद्यते "प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्सोम स उ पंचदश वर्तनिस्त्र्य-विर्वयः कृतमयानां ............... त्रेतायानां ............... द्वापरोयानां ............. आस्कन्दोयानां ................. अभिभूयानां .................।" अत्राऽस्मिन्मन्त्रे कृतादीनां स्तुतिर्कृता। अत्रोक्तं यत् कृतादयोऽस्मान् रक्षन्त्विति। एवं हि वाजसनेयिसंहितायां पुरुषमेधप्रकरणे कृतादीनां कृते मेध्यपुरुषाणां वर्णनं संदृश्यते "कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिन मास्कन्दाय सभा-स्थाणुम्।" तैत्तरीयब्राह्मणेऽपि मेध्यपुरुषवर्णनमुपलभ्यते। तत्रापि 'कृताय सभाविनं। त्रेताया आदिनवदर्शम्। द्वापराय बहिः सदम्। कलये सभास्थाणुम्। "ऐतरेयब्राह्मणेऽपि कृतादिशब्दानामुल्लेखे कृतादिशब्दैः अवस्थाविशेषानामेव बोधो जायते "कलिः शयानो भवति सञ्जिहानस्तु द्वापरः। उकाष्ठंस्त्रेता भवति कृतं सम्पद्यते चरन्॥ चरैवेति चरैवेति।23" उपयुक्तमन्त्रेषु कुत्रचित् आस्कन्द इति नाम वर्णितम् कुत्रचिच्च कलिः इत्यपि दृश्यते। अतः विद्वद्भिरनुमीयते यदनयोः समानार्थवाचकत्वं स्यादिति। अत्रेदं नैवस्फुटं यत् कृतादीनां प्रयोगार्थः कस्यापि कालस्य कृते विद्यतेति। शङ्करबालकृष्ण-दीक्षितवर्यैरनुमन्यते यत् गोपथब्राह्मणे पठितः द्वापरशब्दः कालप-रिमाणं अभिव्यञ्जयति। वेदेषु कल्यादीनां नामानि उत्तरोत्तरक्रमेणा-धिक्येन दृश्यन्तेऽतः तेषां कालेन सह संबंधः निश्चीयते। वस्तुतस्तु गोपथब्राह्मणादन्यत्र कृतादीनामुल्लेखः देवार्थवाचकत्वेन कृतः।

**वेदे संवत्सरवर्णनम् -**

वेदेषु संवत्सरस्योल्लेखो प्राचुर्येणावलोक्यते। तत्र संवत्सरस्य वर्णनं पञ्चसंवत्सरात्मकत्वेन कृतम्। वेदाङ्गज्योतिषे लगधप्रणीते

स्पष्टतया पञ्चसंवत्सरणामुल्लेखो विद्यते। एवं हि महाभारते पुराणेषु च पर्याप्ततयोल्लेखोऽस्ति। ऋग्वेदादौ युगस्य अवयवरूपेण संवत्सरा: वर्णिताः —

**"संवत्सरस्य तदहः परिष्ठयन्मण्डूकाःप्रावृषीणं बभूव।**

**ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्मकृण्वन्तः परिवत्सरीणम्॥"**

मन्त्रेऽस्मिन् संवत्सरपरिवत्सरयोरुल्लेखो कालवाचकत्वेन कृत इति स्पष्टमेवालोक्यते। अत्र अन्येषां त्रयाणामुल्लेखाभाव एव। किन्तु वाजसनेयिसंहितायां तु पञ्चानामपि संवत्सराणा-मुल्लेख: कृतः -

**"संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सराया तीत्वरीमिद्वत्सराया-तिष्कद्वरीं वत्सराय विजर्जरां संवत्सराय पलिक्नीम् ....।"**

अत्रोऽपरि मन्त्रे संवत्सरशब्दस्य पुनरुक्तिर्विद्यते तेनैकस्मिन्मन्त्रे संवत्सरशब्दस्य वारद्वयमुल्लेखात् तस्य भिन्नतायाः बोधो भवति। एवं कदाचित् संवत्सराणां षट्त्वमपि विद्वद्भिः अनुमीयते। एवं हि तैत्तरीयब्राह्मणेऽपि संवत्सराणामुल्लेखक्रमः पूर्ववदेव विद्यते —

**"संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सराया-पस्कद्वरीं इद्वत्सराया-तीत्वरीं वतसराय विजर्जरां संवत्सराय पलिक्नीम्।"**

अत्रोक्तमन्त्रेऽपि संवत्सरस्य द्विरुक्तिर्विद्यत अतः संवत्सराणां षट्संख्याऽस्तीति संभावना वरीवर्ति। एवञ्च पूर्वापरोक्तसंवत्सर-योर्भेदोऽपि संभाव्यते। किन्तु अत्र पुनरुक्तेरभिप्रायः द्वितीय-परिवर्तबोधकः इत्यपि संभाव्यते। कुत्रचित्तु चतुष्णामेवसंवत्सराणां निदर्शनं भवति —

**"अग्निर्वाव संवत्सरः। आदित्य: परिवत्सरः। चन्द्रमा इदावत्सरः। वायुरनु-वत्सरः।'**

अत्र चतुष्णामेव वत्सराणामुल्लेखदर्शनं भवति। अनुवत्सरपदप्रयोगः पार्थक्यं निर्दिशति। एवञ्चान्यत्र —

**"संवत्सरोऽसि परिवत्सरोऽसि। इदावत्सरोऽसि इदुवत्सरोऽसि इद्वत्सरोऽसि वत्सरोऽसि।"**

अत्र संवत्सराणां षण्णामान्युक्तानि तेषु "इदुवत्सर" इति पूर्वोक्तमन्त्रेष्वपि नोक्तः। अतोऽत्रास्य प्रयोगः नूतनतया कृतः। इत्थंरुपेण माध्यन्दिनीये पञ्चानां तैकारीये षण्णामन्यत्र च चतुष्णामेव नामानि स्मृतानि। वैदिकसाहित्येऽपि वत्सराणां नामक्रमः सभेदयुक्तो वर्तते। यथा—

1. संवत्सरः, 2. परिवत्सरः, 3. इदावत्सरः, 4. इद्वत्सरः, 5. वत्सरः।

अथवा —

1. संवत्सरः, 2. परिवतसरः, 3. इदावत्सरः, 4. इदुवत्सरः, 5. वत्सरः।

अथवा —

1. संवत्सरः, 2. इदावत्सरः, 3. इदुवत्सरः, 4. इद्वत्सरः, 5. वत्सरः।

अथवा —

1. संवत्सरः, 2. परिवत्सरः, 3. इदावत्सरः, 4. अनुवत्सरः, 5. उद्वत्सरः।

अथवा —

1. संवत्सरः, 2. परिवत्सरः, 3. इदावत्सरः, 4. अनुवत्सरः, 5. इद्वत्सरः।

उपरोक्तेषु वत्सरेषु कुत्रचित् नामभेदः कुत्रचिच्च संख्या भेदोऽपि दृश्यते। एतेषां संवत्सराणां देवता अपि वर्णिताः। तैत्तरीयब्राह्मणे तथा च अन्यत्राप्येतेषां देवतानां नामानि प्रतिपादितानि। अत्रैतेषां वर्णनं विधास्यते —

| क्रमांक संवत्सरनामानि | तै.ब्रा. | गर्गमते | वराहमिहिरमते |
|---|---|---|---|
| 1 संवत्सरः | अग्निः | अग्निः | अग्निः |
| 2 परिवत्सरः | आदित्य: | आदित्य: | आदित्य: |
| 3 इदावत्सरः | चन्द्रः | वायु: | चन्द्रः |
| 4 अनुवत्सरः | वायु: | चन्द्रः | प्रजापतिः |
| 5 इद्वत्सरः | - | मृत्युः | रुद्रः |

### 3.2.4.1. वैदिकयुगे संवत्सरमानम् —

वैदिकसंहितासु पंचसंवत्सराणां वर्णनं विद्यतेऽति पूर्वमेव प्रतिपादितम्। किन्तु तत्रैतेषां संवत्सराणां स्थूलस्वरूपं किमिति नोपलभ्यते। किन्तु श्रौतसूत्रादिषु पञ्चसंवत्सराणां स्पष्टतया वर्गोल्लेख: विद्यते। यथात्र —

**"पञ्चसंवत्सरा वर्गाः। तेषु धीरो मनीषया कर्मण उपसवो विद्यात्। संस्थाविधिषु व्रतानि च।"**

वेदवाङ्मये संवत्सराणां वर्गसम्पादनार्थं षड्विधा मीमांसा कृता। तेषु सावनसंवत्सर इति सुप्रसिद्धः सुगण्यश्चेति। वेदेषु सावनसंवत्स-रगणनाप्रकारवर्णने गदितं यत् "प्रातर्माध्यन्दिन-सायमिति सवनत्रयेण अहोरात्रसाध्य एकः सोमयागो वेदेषु अहः शब्देनाभि-हितः। अतश्च अहः सावनसंज्ञक इति कथ्यते। एवं षड्भिरहोभिः षडहः स्यात्। पञ्चभिः षडहैर्मासो द्वादशभिश्च तैः संवत्सरः सम्पद्यते।" सर्वेष्वपि संवत्सरेषु सावनसंवत्सर अतिप्राचीनः विद्यते। लाट्ॎयायनश्रौतसूत्रे चतुर्विधः सावनसंवत्सरः निदानश्रौतसूत्रे च षड्विधः संवत्सरोऽभिहितः। ज्योतिषग्रन्थेषु केवलं सूर्यसिद्धान्ते एवास्योपयोगो दृश्यते। एकस्मिन् संवत्सरसत्रे यज्ञप्रक्रियायां यो संवत्सरो गृह्यते ततः षण्मासपरिमाणयोः द्वयोर्भागयोर्मध्य एको विषुवद्दिवसः कल्प्यते स्म। तदनुगुणमेव कालान्तरे ज्यौतिषशास्त्रे रवेः दक्षिणोत्तरगोलयोर्मध्यैको विषुवान् दिवसः प्रकल्पितः। तत्रत्यमहोरात्रवृत्तमेव विषुवद्वृत्तमिति कथ्यते। अत्रोक्तेषु षट्ष्वपि संवत्सरेषु लघुतमः 324 सावनात्मको नाक्षत्रसंवत्सरो विद्यते। अत्रत्यमेकं नाक्षत्रं चन्द्रस्येकनक्षत्रभोगकालः कथितः। अनया रीत्या 27 दिवसै: एकोमासः सम्पद्यते। अनेन प्रकारेण अयं चान्द्रनाक्षत्रसंवत्सरो भवति। अयञ्च सावनसंवत्सरतः षट्त्रिंशोनः संवत्सरः कथ्यते। अत्र च त्रयोदशमासाः (13) कल्प्यन्ते तदा 13 & 27 = 351 दिवसात्म-कोऽन्यः नवोनश्चान्द्रनाक्षत्रसंवत्सरो निष्पद्यते।

तृतीयश्च संवत्सरो 354 सावनात्मको भवति। ज्यौतिषशास्त्रे तिथ्यात्मकश्चान्द्रसंवत्सरे-णास्यप्रसिद्धिर्विद्यते। अत्र तु द्वयोर्मासयो-रेकसावनत्यागस्य नियमोऽस्ति। अर्थादत्र 29 सावनात्मकमासो भवति। एवं षड्नः षडहोनो वा संवत्सरः भवति। अत्र षष्टि (60) संख्ययैका तिथि: त्यज्या इति। ज्यौतिषे त्वधुना चतुष्षष्टिसंख्ययैकस्य तिथेः लोपो मन्यते। कृष्णयजुर्वेदस्य उत्सर्गिणामयनसत्रप्रकरणे नियमोऽयं प्रतिपादितो दृश्यते —

**“अमावास्यया मासान् सम्पाद्याहरुत्सृजन्ति अमावास्यया हि मासान् सम्पश्यन्ति, पौर्णमास्या मासान् सम्पाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान् सम्पश्यन्ति।”**

इत्यत्र 354 सावनात्मकचान्द्रसंवत्सरस्य वेदकाले परिज्ञानमासीदि स्पष्टं परिज्ञायते। तत्पश्चात् सावनसंवत्सरो पठितः। ततः परं 366 सावनात्मको सौरसंवत्सरो भवतीति बुधैः समाख्यातपूर्वः। श्रौतसूत्रयोः वर्णनमिदं दृश्यते। तदनुसारेण यथा —

“स एष आदित्यसंवत्सरो नाक्षत्रः। आदित्यः खलु शश्वदेतावद्भिरहो-भिर्नक्षत्राणि समवैति। त्रयोदशाहं त्रयोदशाहमेकैकं नक्षत्रमुपतिष्ठति। अहस्तृतीयञ्च नवधाकृतयोरहो-रात्रयोद्वे द्वे कले चेति संवत्सराः। ताश्चत्वारिंशच्चतुः पञ्चाशतं कलाः। ते षण्णववर्गाः स षट्षष्टित्रिंशतः।”

एतदतिरिच्य लाट्यायनश्रौतसूत्रे निदानश्रौतसूत्रे च 378 सावनात्मकस्तैर्यगयनिक-संवत्सरो भवति। अयं संवत्सरः प्रतितृतीयवर्षे भवति स्म।

**संवत्सरारंभकालः -**

पूर्वं प्रतिपादितेषु षट्ष्वपि संवत्सरेषु चतुर्णामेव संवत्सराणामुपयोगः यज्ञादिकर्म-संपादनाय विहितः। ते च —

1. सावनसंवत्सरः।
2. चान्द्रनाक्षत्रसंवत्सरः।
3. चान्द्रसंवत्सरः।
4. सौरसंवत्सरः।

इत्येतेषां संवत्सराणामारम्भकालविषयकं विशिष्टं विज्ञानं किमिति अन्विष्टे सति नियामकद्वारा तेषामारम्भपरिज्ञानं क्रियते स्म इति परिज्ञायते। यथा —

1. सावनसंवत्सरस्य प्रारम्भकल्पने सूर्योदय एव नियामकत्वेनाङ्गीकृतः। अतोऽत्र प्रारम्भकल्पने न कोऽपि विशेषो दृश्यतेऽति।
2. चान्द्रनाक्षत्रसंवत्सरस्य प्रारम्भावसानयोज्ञानम् गणितवेधादी-त्युभयमाध्यमाभ्यां साध्यम्। अत्र चन्द्र एव नियामकत्वेन स्वीक्रियते। तस्य भगणारम्भावसानयोरत्र नियामक-त्वमिति वेद्यम्।
3. चान्द्रसंवत्सरस्य आरम्भावसानयोः ज्ञानं अन्येषामपेक्षया शीघ्रबोधकं विद्यते। तत्र चन्द्रस्य कलाया ह्रासवृद्धिदर्शनेनेतत्सुकरम्।
4. सौरसंवत्सरपरिज्ञाने सूर्यस्य भगणारम्भावसानयोज्ञाने काठिन्ये सत्यपि तस्योत्तर-दक्षिणगमनं प्रत्यक्षमित्यनेन तज्ज्ञानं सुकरमुपयोगि चेति मन्यते।

वेदेषु सावन-चान्द्रनाक्षत्रसंवत्सरयोरारम्भकालस्य न किमप्युल्लेखो विद्यतेति। एतद्विपरीतं सौरसंवत्सरारम्भस्य तु स्पष्टतया समुल्लेखो लभ्यते। यथा —

**“फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य यत् फल्गुनीपूर्णमासः ...।”**

**“चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत्संवत्सरस्य। यच्चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते॥”**

अत्र चान्द्रसंवत्सरस्यारम्भे फल्गुनीपूर्णमासः चित्रापूर्णमासश्चेति द्वे मते उपलभ्येते। तथा चाधुना फल्गुनीपूर्णमासतो वर्षारम्भो मन्यते। शतपथब्राह्मणेऽपि वसन्तर्तोः प्रथमोल्लेख-दर्शनात् तत एव सौरवर्षारम्भो विज्ञायते। अनेनेदं स्पष्टं भवति यत् तदानीं मधुमासस्यारम्भादेव संवत्सरारम्भ आसीदिति।

**वेदे अयनवर्णनम् —**

यान् षण्मासान् दक्षिणादित्य एति, यान् षण्मासानुदङ्ङादित्य एति। छन्दोगा अपियान् षड्दक्षिणेति मासांस्तान्, यान् षड्उदगेति मासांस्तान्।

इत्यत्र सूर्यस्यायनचलनमुपवर्णितम्। सूर्यो यदा उत्तराभिमुखमयते तदोत्तरायणं यदा च दक्षिणाभिमुखमयते तदा दक्षिणायनं भवति। कैश्चिन्मन्यते यत् **“विषुववृत्ताद्दक्षिणायां दिशि रविर्यावत्कालं प्रचलति तावान् कालो हि दक्षिणायनम्, तत उत्तरतश्च यावत्कालं प्रचलति तावान् कालो हि उत्तरायणम् भवतीति। परञ्च वेदादिषु मतमिदं पूर्वमेव निराकृतं दृश्यते।”**

**“वसन्तो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो ....। स यत्रोदगावर्तते देवेषु तर्हि भवति .....। अथ यत्र दक्षिणावर्तते। पितृषु तर्हि भवति।”**

भारतीयज्योतिषेतिग्रन्थकारेण शङ्करबालकृष्णदीक्षितेनानुमन्यते यत् “उदगावर्तते” “दक्षिणावर्तते” इत्यत्र विषुववृत्तादुदग्दिशि दक्षिणदिशि च रविर्गच्छतीत्यर्थबोधो ज्ञेयः।

वस्तुतस्तु पुराणप्रसिद्धमिदं तथ्यमपि द्रष्टव्यमत्रविद्यते यत् उत्तरध्रुवे देवाना निवासस्थलं दक्षिणध्रुवे च असुराणां (दैत्यानां) निवासो विद्यते। कैश्चिदाचार्यैः दक्षिणध्रुवे पितृूणां निवास इति अभिमन्यते। अनयोः देवासुरयोः क्षितिजं विषुववृत्तमेव भवत्यनेन विषुववृत्तादुदग्गते रवौ देवानां दिनमसुराणाञ्च रात्रिर्भवति। तथैव हि विषुववृत्ताद्दक्षिणगेरवौ असुराणां दिनं देवानां च रात्रिर्भवति। एतत्तु परस्परं विपर्ययेन भवति। किन्तु पुराणादिषु सौम्ययाम्यगोलयोः स्थाने सौम्ययाम्यायने एव स्वीक्रियेते। अतोऽत्र “उदगावर्तते” “दक्षिणावर्तते” इत्यनेन उत्तरदक्षिण-गोलयोरभिप्रायः स्वीकृतः। तत्र हि देवभागे वसन्तग्रीष्मवर्षादिऋतवः असुरभागे (पितृभागे) च शरद्धेमन्तशिशिराणामवस्थितिर्भवति। अतः दीक्षितमतं समीचीनमेवेति।

तैत्तरीय संहितायामपि —

**“तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेण।”**

वेदे ऋतवः —

कालवाचकतत्त्वेषु प्रधानकालवाचकत्वेन येषामवयवानां सौरादिसंवत्सराणां अयनादीनां निर्वचनं वेदे समाम्नातं तेष्वन्यतमाः ऋतवः सन्तीति। वेदेषु ऋतूणां संख्या षडेव वर्णिता। यथात्र शतपथब्राह्मणे —

**“वसन्तो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो ....।”**

किन्तु कुत्रचित् पञ्चानां ऋतूणामपि निदर्शनं जायते। यथा —

**“पञ्च वा ऋतवः संवत्सरः।”**

यत्र पञ्चानामेवर्तूनां वर्णनमुपलभ्यते तत्र हेमन्तशिशिरर्तोः संयुक्तत्वमभिप्रेतम्। यथा च —

**“द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन।”**

इति रीत्या स्पष्टं भवति यत् हेमन्तशिशिरयोः समाहारेण पञ्चर्तवः भवन्ति। अन्यत्र स्पष्टमेवर्तूनां षाड्विध्यं प्रतिपादितं वर्तते। यत्र-यत्र षडर्तूनां वर्णनमस्ति तत्र हि वसन्तस्योल्लेखः प्राथम्येन दृश्यते। शिशिरस्य वर्णनं अन्तिमत्वेन तथा च कुत्रचित् हेमन्तोपि चरमत्वेन। वसन्तस्य मुख्यत्वे पृथग्विधानमपि लभ्यते। यथा —

**"मुखं वा एतदृतूनां यद्वसन्तः।"**

सन्दर्भेऽस्मिन् संवत्सरस्यवर्णनं पक्षित्वेन विद्यते। तस्य पक्षिणः —

**"वसन्तो हि शिरो ग्रीष्मो दक्षिणपक्षः शरदुत्तरपक्षः वर्षा पुच्छं हेमन्तो मध्यमिति।"**

वसन्तः

शरद् हेमन्तः ग्रीष्मः

वर्षा

अत्र ऋतुचक्रे कस्यर्तोः कदारम्भ इति कथनं दुष्करमेव तत्र ऋतुस्थितेः सूर्यावलम्बनत्वात् सौरमासतिथीनामनिश्चयत्वाच्च। यजुर्वेदे तु कुत्रचित् त्रयाणामेवर्तूणां वर्णनं लभ्यते। यथात्र—

**"वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः।"**

**वेदे मासविचारः —**

वेदे मासादीनां वर्णनमुपलभ्यते किन्त्वत्र माससंख्यायां भेदाः दृश्यन्ते। द्वादशमासाः त्रयोदश वा मासः संवत्सर इत्याख्यातस्तत्र। कदाचित्तु चतुर्दशमासाः संवत्सर इत्यपि वेदेषु पठ्यते। अतोऽत्र विद्वद्भिः संभाव्यते यदिमे मासाः चान्द्रा एव स्युः यतोहि सौरमासास्तु द्वादश एव। तेषां द्वादशाधिकसङ्ख्याया असम्भवादिति। एतस्मिन्संबंधे द्रष्टव्यम् —

**"द्वादश रात्रीर्दीक्षितः स्यात् द्वादश मासाः संवत्सरः ....।**

**त्रयोदश रात्रीर्दीक्षितः स्यात् त्रयोदश मासाः संवत्सरः ....॥"**

अत्र द्वादश त्रयोदश वा मासा इत्यनेन चान्द्रा एव मासाः अनुमीयन्ते। एवञ्च मासानां चतुर्दश नामान्यपि वेदे वर्णितानि। तद्यथा —

"मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयामगृहीतोसि संसर्पोहस्पत्याय त्वा॥47"

इत्यत्र इमे मासाः वर्णिताः —

| | | | |
|---|---|---|---|
| 1. मधुः | 2. माधवः | 3. शुक्रः | 4. शुचिः |
| 5. नभः | 6. नभस्य | 7. इषः | 8. ऊर्जः |
| 9. सहः | 10. सहस्यः | 11. तपः | 12. तपस्यः |
| 13. संसर्पः | 14. अंहस्पतिः। | | |

कैश्चिदनुमन्यते यत् संसर्प अंहस्पत्ययोरैक एव मासत्वेन गणना क्रियते। अत्र संसर्पशब्दः मलमासवाचकः, अंहस्पतिशब्देन च क्षयमासो गृहीतः। अनेनेदमनुमीयते यद्वेदप्रतिपादितमासाः चान्द्रा एव विद्यन्ते। किन्तु सौरमासस्य वर्णनमपि यत्र - तत्र प्राप्यते।

शतपथब्राह्मणे अग्न्याधानप्रसङ्गे वैशाखनाम्नाऽपि माधव मासो हि कथितो दृश्ते। तैत्तरीयब्राह्मणे तु चतुर्विंशति संख्यकानां अर्धमासानां नामानि पठितानि। यथात्र —

"पवित्रम् पवयिष्यन् पूतो मेध्यः। यशो यशस्वानायुरमृतः। जीवो जीविण्यन्त्स्वर्गो लोकः। सहस्वान् सहीयानोजस्वान् सहमानः। जयन्नभिजयन्त्सुद्रविणो द्रविणोदाः। आद्र्पवित्रो हरिकेशो मोदः प्रमोदः।48"

अत्र इमे द्वादश अर्धमासाः उक्ताः —

1. पवित्रन्, 2. पवयिष्यन्, 3. पूतः, 4. मेध्यः, 5. यशः, 6. यशस्वान्, 7. आयुः, 8. अमृतः, 9. जीवः, 10. जीविण्यन्, 11. स्वर्गलोकः, 12. सहस्वान्, 13. सहीयान्, 14. ओजस्वान्, 15. सहमानः, 16. जयन्, 17. अभिजयन्, 18. सुद्रविणः, 19. द्रविणोदः, 20. आद्र्ः, 21. पवित्रः, 22. हरिकेशः, 23. मोदः, 24. प्रमोदः।

इत्युपरोक्तरीत्या द्वादशमासेषु अर्ध-अर्ध मासानां (एकैकपक्षस्येति भाव्यम्) नामकरणं कृत्वा प्रयोगः क्रियते स्म इति दृश्यते। वेदे एव मधुमाधवादिमासभिन्नान्यपि नामानि मासानां पठितानि। यथात्र तैकारीये —

"अरुणोरुणजाः पुण्डरीको विश्वजिदभिजित्। आद्र्ः पिन्वमानोऽन्नवान् रसवा-निरावान्। सर्वोषधः सम्भरो महस्वान्।49"

मासानां वेदेषु यानि नामानि दृश्यन्ते तानि मधुमाधवादीन्येव। तेषां चैत्रवैशाखादिनक्षत्र-मूलकनामानि नात्यधिकान्यवलोक्यन्ते। किन्तु तैतिरिये —

**"फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य। यत्फल्गुनीपूर्णमासो मुखत एवं संवत्सरमारभ्य दीक्षन्ते ....। चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत्संवत्सरस्य ....।"**

अत्रास्मिन्मन्त्रे फल्गुनीपूर्णमासश्चित्रापूर्णमासश्चेत्यनेनेदं संकल्प्यते यत् पूर्णिमाः कस्मिंश्चिन्निश्चितनक्षत्रे एव भवन्तीति विज्ञातमासीत्। पूर्णिमायाः नक्षत्रमूलकनामानि ब्राह्मणकाले बहुत्र पठितानि। यथा —

**"न पूर्वयोः फल्गुन्योरग्निमादधीत। एषा वै जघन्या रात्रिः संवत्सरस्य। यत्पूर्वे-फल्गुनी। ... उत्तरयोरादधीत। एषा वै प्रथमा रात्रिः संवत्सरस्य। यदुत्तरे फल्गुनी।"**

अत्र पूर्णिमायाः स्पष्टनिर्देशाभावेऽपि लक्ष्यते यत् पूर्वफल्गुन्योत्तरफल्गुन्या च युक्ता पूर्णिमा इत्येवार्थोऽभिप्रेत इति भाति। वेदेषु फाल्गुनीपूर्णमासीतिप्रयोगो संलक्ष्यते। कालान्तरेकेवलं फाल्गुनीशब्दप्रयोग एव व्यवहृतः। ब्राह्मण ग्रन्थेष्वपि फाल्गुनीपूर्णमासीति प्रयोगो दृश्यते। यथात्र —

**"एषाह संवत्सरस्य प्रथमा रात्रिर्या फाल्गुनीपूर्णमासी।"**

एवं हि गोपथब्राह्मणेऽपि तद्वदेव प्रयोगोऽभिहितः।

वेदे पक्षविचारः —

वेदेषु मासानां द्वैविध्यं दृश्यते।

1. अमान्तादमान्तं यावत्। 2. पूर्णान्तः पूर्णान्तं यावत्।

अत्र हि "अमान्तादमान्तो हि चान्द्रो हि मास" इति भास्करादिभिरपि अनुमतम्। एकामावास्यातः द्वितीयामावास्यां यावदेको चान्द्र मास इत्येकं मतम्। द्वितीयञ्च "पूर्णो मासो यस्यामिति पौर्णमासी" इत्यादिभिर्वाक्यैः पौर्णमास्यां मासपूर्तिरपि पठ्यते वेदे। यथात्र — **"अमावास्यया मासान् सम्पाद्याहरुत्सृजन्ति अमावास्यया हि मासान् सम्पश्यन्ति। पौर्णमास्यां मासान् सम्पाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान् सम्पश्यन्ति।"**

अनेन कथनेन विज्ञायते यत् केचित्तु अमावास्यायां मासपूर्कामामनन्ति केचिच्च पौर्णमास्यां मासपूर्तिं परिपश्यन्ति।

भारते देशे दक्षिणोत्तरसम्प्रदायभेदात् मासपूर्का मन्यते। दक्षिणभारते अमावास्यायां उत्तरे च पूर्णिमायां मासपूर्त्तेः ग्रहणं क्रियते। अत्रोभयमतमपि वेदसम्मतमेवेति संहितामन्त्रेण निश्चीयते। मासस्य पूर्णान्तत्वे अमान्तत्त्वे सति पक्षस्यापि पौर्वापर्यमालोच्यते। यतोहि यदा मासस्य पूर्णिमान्तामान्तभेद उत्पद्यते तदा पक्षयोरपि स्वतः द्वैविध्यमापतति। तत्तु क्रमशः —

1. अमान्तमासग्रहणे प्रथमः शुक्लपक्षः।
2. पूर्णिमान्तमासग्रहणे प्रथमः कृष्णपक्षः।

इत्येव मतं तैत्तरीयब्राह्मणेऽपि —

**"पूर्वपक्षं देवान्वसृज्यन्त। अपरपक्षमन्वसुराः। ततो देवा अभवन्। परासुराः।'**

अत्रेदं कथितं यत् पूर्वपक्षे देवा अजायन्त परपक्षे च असुराः। अनेन देवानां विजयोऽभूत् असुराणां च पराजयः। इत्यनेनेदं स्पष्टं भवति यत् देवानां पूर्वपक्षः शुक्लपक्षः असुराणां परपक्षश्च कृष्णपक्षः इति। वेदेऽपि-

**"पूर्वपक्षाश्चितयः। अपरपक्षाः पुरीषम्।"**

पूर्वपक्षः शुभः अपरपक्षश्चाशुभेति प्रतिपादितमत्र।

वेदे तिथिविचारः —

ब्राह्मणसाहित्यानुसारेणेदं ज्ञायते यत् वैदिकयुगे दिनाङ्कपरिज्ञानाय उभयोरपिपक्षयोः पार्थक्येन सम्बोधनान्यासन्। शुक्लकृष्णपक्षयोः दिवसानां नाम्रा एव परिज्ञानं भवति स्म। तथा च दिनरात्रीणामपि भिन्नापि नामानि आसन् इत्यपि तत्रोल्लेखेन स्पष्टं भवति। ब्राह्मण ग्रन्थेषु प्रतिपादितानुवाकेषु वाक्यत्रयमुपलभ्यते यत्र प्रत्येकस्मिन्नपि वाक्ये पञ्चनामानि विद्यन्ते। अनया रीत्या शुक्लपक्षस्य पञ्चदश दिनानां नामानि (संज्ञाः) तथा च शुक्लपक्षस्यैव रात्रीणामपि नामानि वर्णितानि। पुनश्चाग्रे कृष्णपक्षस्यापि दिनरात्रीणां क्रमेण पञ्चदश-पञ्चदश नामानि प्रतिपादितानि सन्ति। तानि च —

"संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्। संकल्पमानं प्रकल्पमानमुप-कल्पमानमु-पक्लृप्तम्। श्रेयोवसीय आयत्सम्भूतं भूतम्।"

अत्र शुक्लपक्षीय पञ्चदशदिनानां नामधेयानि वर्णितानि। शुक्लपक्षस्य रात्रीणां नामान्यपि अधोलिखितरीत्या वर्ण्यन्ते —

**"दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना। अप्यायमाना प्यायमाना प्याया सूमृतेरा। आपूर्यमाया पूर्यमाया पूरयन्ति पूर्णा पौर्णमासी।"**

एवं हि कृष्णपक्षस्य दिनानां नामान्यपि ब्राह्मणे एव वर्णितानि। यथात्र —

**"प्रस्तुतं विष्टुतं संस्तुतं कल्याणं विश्वरूपम्। शुक्रममृतं तेजस्वि तेजः समृद्धम्। अरुणं भानुमान् मरीचिमदभितपत् तपस्वत्।"**

कृष्णपक्षरात्रीणां नामान्यपि अनुवाकेषु अधोलिखितरूपेण स्मृतानि सन्ति —

**"सुता सुन्वती प्रसूता सूयमानाऽभिषूयमाणा। पीति प्रपा सम्पा तृप्तिस्तर्पयन्ती। कान्ता काम्या कामजाताऽऽयुष्मती कामदुघा।"**

अतः अत्रोपरोक्तरीत्या ज्ञायते यत् वैदिकयुगे दिनाङ्कस्य परिज्ञानार्थं एका समुन्नता रीतिः परिपाल्यते स्म। वस्तुतः अनेन एकैकस्य दिवसस्य रात्रीणां च नामकरणं कृत्वा व्यवहारः उचित एव प्रतिभाति। सा च नामकरणरीतिः क्रमशः प्रवर्तनक्रमेण व्यवहारे सम्मिलि-तासीदिति। तथा च कालवाचकशब्दानामुल्लेखस्तु वैदिकसाहित्ये बाहुल्येनोपलभ्यते तथापि तिथिशब्दस्य वर्णनं तावत् न दृश्यते। एतेरेयब्राह्मणे61 विशेषेण तिथेरुल्लेखः समुपलभ्यते यत्र तिथेः वर्तमानिकोऽर्थः न दृश्यते। सर्वेषामपि तिथीनामुल्लेखः वेदे न प्राप्यते परञ्च अमावस्य-पूर्णिमयोः पञ्चदशीति प्रयोगदर्शनात् तिथीनां वर्तमानिकस्वरूपं वैदिकयुगीयं प्रमाणी भवति। यथात्र —

**"चन्द्रमा वै पञ्चदशः। एष हि पञ्चदश्यामपक्षीयते। पञ्चदश्यामापूर्यते।"**

अनुवाकेऽस्मिन् पञ्चदशीति संज्ञा पूर्णिमामावास्ययोः विहिता। अनेन मासे त्रिंशकाथीनां संङ्ख्या प्रमाणीभवति। वेदे कुत्रचिदपि तिथिशब्दस्य प्रयोगः एतेषां सन्दर्भे न कृतः। अत इदं प्रतिभाति यत् वेदकाले पूर्णिमामावास्यादीनां संज्ञा "तिथिः" इति नासीत्। अतः तिथिशब्दस्या-धुनिक प्रयोगो वेदोत्तरवर्ति एव। वेदे प्रसङ्गवशात् बहुत्र तिथीनां नामानि प्राप्यन्ते। सामविधान-ब्राह्मणे63 कृष्णचतुर्दश्याः कृष्णपञ्चम्याः शुक्लचतुर्दश्याश्च वर्णनं दृश्यते। पूर्णिमामावस्याभ्यां सह अष्टकायाः प्रयोगोऽपि यदा-कदा दृष्टस्तत्र "अष्टमी" इत्यर्थो गृहीतः। यथात्र —

**"द्वादश पौर्णमास्यः। द्वादशाष्टकाः। द्वादशामावास्याः।"**

कुत्रचित्तु अष्टकायाः स्थाने "एकाष्टका" इति प्रयोगोऽपि संदृश्यते —

**"द्वादश पौर्णमास्यो द्वादशैकाष्टका द्वादशामावास्याः।"**

अत्र या एकाष्टका कथिता तस्यार्थः कृष्णाष्टमी इति। एवं हि अन्येषामपि तिथीनां प्रयोगदर्शनं वेदे भवति। ब्राह्मण साहित्ये व्यष्टकोद्दृष्टयोः प्रयोगः संलक्ष्यते। यथा —

**"पौर्णमास्यां पूर्वमहर्भवति, व्यष्टकायामुत्तरं ....।**

**अमावास्यायां पूर्वमहर्भवति, उद्दृष्ट उत्तरम्॥"**

पौर्णमास्यानन्तरं व्यष्टकोल्लेखात् अनया तु कृष्णपक्षप्रतिपकाथेः ग्रहणं स्वीकृतम्। एवं हि अमावास्यायाः अनन्तरं "उद्दृष्ट" इति प्रयोगेन शुक्लप्रतिपकाथेः ग्रहणं भवति।

अनेनेदं विज्ञायते यत् वास्तविकरूपेण वैदिकयुगे तिथीनां गणनारीतिस्तु दृश्यते किन्तु वर्तमानिकाःयाः तिथयः लोकव्यवहारे सन्ति तासां समेषामपि नामोल्लेखस्य तु अभाव एव। किन्तु भिन्न संज्ञाभिः तिथीनां गणना क्रियते स्म इत्यत्र नास्ति संशयः।

3.2.10. वेदे मुहूर्तविचारः —

वेदे कालपदार्थानां अन्वेषणे मुहूर्तानामपि समावेशोऽस्ति यतोहि तत्र मुहूर्त्तचिन्तनम् अतिशय सूक्ष्मरूपेण विद्यते। दिनमानस्य त्रिंशत्तमो भागः मुहूर्तः कथितः। वैदिकसाहित्ये मुहूर्तशब्दप्रयोगोऽपि दृश्यते —

**"रमध्वं मे वचसे सोम्याय ऋतावरीरूप मुहूर्तमेवैः।'**

अन्यत्र च मुहूर्तविवेचनं दृश्यते। यथा —

**"अथ यच्चतुर्विंशतिमात्मनोऽकुरुत। तस्माच्चतुर्विंशत्यर्थ मासः। संवत्सरः स एतैश्चतु-र्विंशत्या त्रिंशदिष्टकैरात्मभिन्नं व्यभवत् स पञ्चदशाहन्नोरूपाण्यपश्यदात्मनस्तन्वो मुहूर्ताँल्लो-कम्पृणाः पञ्चदशैव रात्रेस्तद्यन्मुहुः त्रायन्ते तस्मान्मुहूर्ताः। अथ यत् क्षुद्राः सन्त इमाँल्लोकानापूरयन्ति तस्माँल्लोकम्पृणाः।"**